शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

---

चतुर्वर्गफलप्राप्तये वेदादिषु सत्सु काव्यस्य कियानुपयोगः।

---

ननु 'वेदाध्यायोऽध्येतव्यः' चतुर्वर्गपुरुषार्थं साधनत्वं प्रतीयते, किञ्चनायेन तु चतुर्वर्गफलप्राप्तिः काव्यादेवेति उच्यते। अत्राह- चतुर्वर्गफलप्राप्तये द्वौ पन्थानौ। एकः वेदादिः, अपरश्च काव्यम्। ते ये परिपक्वबुद्धयः सन्ति तेभ्यो वेदादिशास्त्रेभ्यो नीरसतया दुःखादेव चतुर्वर्गफलप्राप्तिर्भवति। किन्तु ये सुकुमारमतयः सन्ति ते नीरसानि शास्त्राण्यध्येतुमसमर्थाः भवन्ति, तेभ्यः चतुर्वर्गफलप्राप्तये काव्यशास्त्रमेव विहितम्। काव्यं तु काव्यशास्त्रेण कान्तासम्मिततयोपदेशेन परमानन्दसन्दोह-जनकतया सुखादेव चतुर्वर्गफलप्राप्तिः।

ननु तर्हि परिणतबुद्धिभिः सत्सु वेदशास्त्रेषु किमिति काव्ये यत्नः करणीयं इत्यपि न वक्तव्यम्। कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा प्रवृत्तिः साधुतरा न स्यात्?। अतः उक्तं 'चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत' इति सूक्तिं 'काव्यशास्त्रविनोदेन कालो गच्छति धीमताम्' इति सूक्तिमनुसृत्य परिणतबुद्धिभिरपि चतुर्वर्गफलप्राप्तये काव्यशास्त्रस्य परिशीलनं कर्तव्यमेवेति। वेदशास्त्रे प्रभासाध्यः चतुर्वर्गफलः (धर्मार्थकाममोक्षः) प्राप्तिः किन्तु काव्यशास्त्रे सुकुमारमतीनामपि अल्पधियामपि धर्मार्थकाममोक्षरूपं प्राप्तिः अति सुलभतयाभवतीति विनिश्चितम्।

इतिदिक्

उपेन्द्र झा
4/8/20
एसो० प्रो० साहित्य
रा० उ० सं० महा० वि० सुरसेना
पूर्णियाँ।

---

शास्त्री तृतीय खण्डस्य कृते (साहित्यम्)
साहित्य दर्पण: नवम परिच्छेद:

रीति नियमानां रचनादीनां व्यत्ययः कथं भवति !
अथवा
'क्वचित्तु 'वक्त्राद्यौचित्यवशादन्यथा रचनादयः' इति कारिकायाः व्याख्या ।

यद्यपि रचना, वृत्तिः, वर्णश्च गुणाधीनाः तथापि वक्त्रौचित्यात्, वाच्यौचित्यात्, प्रबन्धौचित्याच्च क्वचित् अन्यथा भावो भवति रचनादीनाम् । तत्र वक्त्रौचित्याद् यथा —

मन्थायस्तार्णवाम्भः प्लुतकुहरचलन्मन्दरध्वानधीरः
कोणाघातेषु गर्जत्प्रलयघनघटान्योन्यसङ्घट्टचण्डः ।
कृष्णाक्रोधाग्रदूतः कुरुकुलनिधनोत्पातनिर्घातवातः
केनास्मत्सिंहनादप्रतिरसितसखो दुन्दुभिस्ताडितोऽयम् ॥

अत्र वाच्याद्यैः प्रशम रूपे प्रबन्धे च वेणीसंहार नाटक रूपे दीर्घ-समासा, उद्धता रचना, अभिनय प्रतिकूलत्वेन, दीर्घ समासेन अर्थ-प्रतीतौ विलम्बत्वाच्च अनुचितैव, किन्तु वक्ता भीमः क्रोधी भीमसेनः, अतः तस्य औद्धत्यद्योतनाय उद्धता रचना कृता ।

वाच्यौचित्याद् यथा-

मूर्धव्याधूयमानध्वनदमरधुनीलोलकल्लोलजालो-
द्भूताम्भः क्षोदरम्यात् प्रकरकलितनभः शिप्रनक्षत्रलक्ष्म ।
ऊर्ध्वन्यस्ताङ्घ्रिदण्डभ्रमिभरभसोद्भवन्ते भवत्प्रकोप-
भ्रान्तब्रह्माण्डखण्डं प्रवितरतु शिवं शाम्भवं ताण्डवं वः ॥

अत्र वक्तृ प्रकृतिः सूत्रधारो वक्ता, प्रबन्धश्च नाटकः । तत्र दीर्घ समासमयी उद्धता रचना नोचिता । किन्तु अत्र लोके संहारकस्य शम्भोः उद्धतं ताण्डवं वाच्यम् । अतः तादृशस्य उद्धतताण्डवस्य प्रतिपादनाय या उद्धता रचना कृता सोचितैव ।

प्रबन्धौचित्याद् यथा नाटकादौ रौद्रेऽपि अभिनय प्रतिकूलत्वेन न दीर्घ समासादयो निबध्यन्ते । एवमाख्यायिकायां शृङ्गारेऽपि न मसृणवर्णादयः, किन्तु विकटबन्धत्वमेव तद्धर्म प्राधान्यात् तद्वर्णे च विकटबन्धस्यैवौचित्यात् । अपि च तत्र वक्ता कविः भवति न तु राजा, कोमला रचना च राजोचितत्वादेव शोभते । कथायां रौद्रेऽपि नात्यन्तम् उद्धताः रचनादयो विधीयन्ते, यतो हि तत्र वक्ता क्रोधाविष्टो न भवति वर्णनीयस्य स्फुटं प्रतिपत्तेरेवोद्देश्यत्वात् । एवम् अन्यदपि औचित्यादि अनुसन्धेयम् ।

उपेन्द्र झा
4/9/20
एसो० प्रो० साहित्य
रा० उ० सं० महावि०
कुल्हैया, पूर्णियाँ

शास्त्री प्रथम खण्डस्य कृते (साहित्यम्)

चतुर्वर्गफलप्राप्तये वेदादिषु सत्सु काव्यस्य कियानुपयोगः ।

ननु वेदस्यापि ऽस्य एव 'चतुर्वर्ग-पुरुषार्थ' साधनत्वं प्रतीयते, किन्त्वत्र तु चतुर्वर्गफलप्राप्तिः काव्यादेवेति उच्यते । अत्राह- चतुर्वर्गफलप्राप्तये ही कथ्यते । यतः वेदादिः, अपरस्य काव्यम् । ते ये परिपक्व बुद्धयः सन्ति तेभ्यो वेदादि शास्त्रेभ्यो नीरसतया दुःखादेव चतुर्वर्गफल प्राप्तिर्भवति । किन्तु ये सुकुमार मतयः सन्ति ते नीरसानां शास्त्राध्ययने असमर्थाः भवन्ति, तेभ्यः चतुर्वर्ग फल प्राप्तये काव्य शास्त्रमेव विकल्पः । यतः तु काव्य शास्त्रेण कान्तासम्मितयोपदेशेन परमानन्द सन्दोह-जनकतया सुखादेव चतुर्वर्गफलप्राप्तिः ।

ननु तर्हि परिणत बुद्धिभिः सत्सु वेद शास्त्रेषु किमिति काव्ये यत्नः करणीयं इत्यपि न वक्तव्यम् । कटुकौषधोपशमनीयस्य रोगस्य सितशर्करोपशमनीयत्वे कस्य वा रोगिणः सितशर्करा प्रवृत्तिः साधुतरा न स्यात्? अतः अर्के चेन्मधु विन्देत किमर्थं पर्वतं व्रजेत' इति सूक्तिं 'काव्य शास्त्र विनोदेन कालो गच्छति धीमताम्' इति सूक्तिमनुसृत्य परिणत बुद्धिभिरपि चतुर्वर्ग फल प्राप्तये काव्य शास्त्रस्य परिशीलनं कर्तव्यमेवेति । वेद शास्त्रे प्रभु साम्यः चतुर्वर्ग फलः (धर्मार्थकाम मोक्षः) प्राप्तिः किन्तु काव्य शास्त्रे सुकुमार मतीनामल्पधियामपि धर्मार्थकाममोक्षस्य प्राप्तिः अति सुलभतया भवतीति विनिश्चितम् ।

इतिदिक्

उपेन्द्र झा
4/8/20
सहा० प्रो० साहित्य
रा० उ० सं० महा० वि० कुरुक्षेत्र
हरियाणा ।